अन्वय—यथा ( अ० ) बीजाद् ( न० ५.१ ) वृक्षः ( पुं० १.१ ) भवेत् यथा ( क्ष ) वृक्षात् ( पुं० ५.१ ) पुष्पं ( न० १.१ ) फलं ( न० १.१ ) [भवेत्] तथा ( अ० ) सर्वे ( पुं० १.३ ) रसाः ( पुं० १.३ ) मूलम् ( न०१.१ ) तेषु ( पुं० ७.३ ) भावाः ( पुं० १.३ ) व्यवस्थिताः ( पुं० १.३ ) ।

अर्थ—जिस प्रकार बीज से वृक्ष तथा क्रमशः उससे पुष्प तथा फल उत्पन्न होते हैं । उसी प्रकार रस मूल ( प्रधान ) हैं, उन पर भाव स्थित हैं ।

## रसानामुत्पाद्योत्पादक-सम्बन्धः

शृङ्गाराद्धि भवेद्धास्यो रौद्रात्तु करुणो रसः ।
वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः ॥ ३९ ॥

शृङ्गारानुकृतिर्यो तु स हास्य इति संज्ञितः ।
रौद्रस्यापि च यत् कर्म स ज्ञेयो करुणो रसः ॥ ४० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



वीरस्यापि च यत् कर्म सोऽद्भुतः परिकीर्तितः ।
बीभत्सदर्शनं यच्च भवेत् स तु भयानकः ॥ ४१ ॥

ना० शा० ६।३९-४१

अन्वय—शृङ्गारात् ( पुं ५.१ ) हि ( अ० ) हास्यः ( पुं० १.१ ) भवेत् रौद्रात् ( पुं० ५.१ ) तु ( अ० ) करुणः ( पुं० १.१ ) रसः ( पुं० १.१ ) वीरात् ( पुं० ५.१ ) च एव ( अ० ) अद्भुतोत्पत्तिः ( स्त्री० १.१ ) बीभत्सात् ( पुं० ५.१ ) च ( अ० ) भयानकः ( पुं० १.१ ) ॥ ३९ ॥

अर्थ—शृंगार से हास्य की, रौद्र से करुण रस की, वीर से अद्भुत की तथा बीभत्स से भयानक की उत्पत्ति होती है ।

अन्वय—या ( स्त्री० १.१ ) तु ( अ० ) शृङ्गारानुकृतिः ( स्त्री० १.१ ) सः ( पुं० १.१ ) हास्यः ( पुं० १.१ ) इति ( अ० ) संज्ञितः । अपि ( अ० ) च ( अ० ) रौद्रस्यस्य ( पुं ६.१ ) यत् ( न० १.१ ) कर्म ( न०१.१ ) सः ( पुं १.१ ) करुणः ( पुं० १.१ ) रसः ( पुं० १.१ ) ज्ञेयः ( पुं० १.१ ) ॥ ४० ॥

अर्थ—शृङ्गार की जो अनुकृति है उसे हास्य की संज्ञा दी गयी है । और रौद्र का जो कार्य है उसे करुण रस समझना चाहिये ।

अन्वय—वीरस्य ( पुं० ६.१ ) अपि ( अ० ) च ( अ० ) यत् ( नं १.१ ) कर्म ( न० १.१ ) सः ( पुं० १.१ ) अद्भुतः ( पुं० १.१ ) परिकीर्तितः । यत् ( न० १.१ ) च ( अ० ) बीभत्सदर्शनं ( न० १.१ ) सः ( पुं०१.१ ) उ ( अ० ) भयानकः ( पुं० १.१ ) भवेत् ।

अर्थ—वीररस का जो कार्य है उसे अद्भुतरस कहा गया है । और जो बीभत्स दिखलाई देता है उसे भयानक करते हैं ।

## काव्यगुणाः

( सू० ९० ) आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ॥ ६८ ॥
शृङ्गारे अर्थात् सम्भोगे । द्रुतिर्गलितत्वमिव ।
अव्यत्वं पुनरोजःप्रसादयोरपि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



(सू० ९१) करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्।
अत्यन्तद्रुतिहेतुत्वात्।

(सू० ९२) दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः ॥ ६९ ॥
चित्तस्य विस्ताररूपदीप्तत्वजनकमोजः।

(सू० ९३) बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च।
वीराद्बीभत्से ततो रौद्रे सातिशयमोजः।

(सू० ९४) शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः ॥ ७० ॥

(सू० ९५) व्याप्नोत्यन्यत्प्रसादोऽसौ सर्वत्र विहितस्थितिः।

काव्य प्रकाश अष्टम उल्लास

अन्वय—आह्लादकत्वं (न० १.१) माधुर्यं (न० १.१) शृङ्गारे (पुं० ७.१) [चित्तस्य] द्रुतिकारणम् (न० १.१) [अस्ति] ॥ ६८ ॥

अर्थ—आह्लाद अर्थात् आनन्दस्वरूप माधुर्य शृङ्गार में चित्त की द्रुति का कारण है।

अन्वय—शृङ्गारे (पुं० ७.१) अर्थात् सम्भोगे (पुं० ७.१)। द्रुतिः (स्त्री० १.७) गलितत्वं (न० १.१) इव (अ०)। श्रव्यत्वं (न० १.१) पुनः (अ०) ओजप्रसादयोः (पुं० ७.२) अपि (अ०)।

अर्थ—शृंगार में अर्थात् सम्भोग में। द्रुति गलितत्व अर्थात् चित्त में काठिन्य का अभाव। भामह ने माधुर्य का लक्षण आह्लादकत्व न करके श्रव्यत्व सुनने योग्य अर्थात् सुनने में अच्छा लगने वाला किया है। किन्तु वह श्रव्यत्व ओज तथा प्रसाद में भी होने से लक्षण अतिव्याप्ति दोष से दूषित हो जायगा।

अन्वय—[तत् माधुर्यं सम्भोगात्] करुणे (पुं० ७.१) [तस्मादपि] विप्रलम्भे (पुं० ७.१) [ततोऽपि] शान्ते (पुं० ७.१) च (अ०) अतिशयान्वितम् (न० १.१)

अर्थ—सम्भोग की अपेक्षा करुण में, उनकी अपेक्षा विप्रलम्भ में तथाउसकी अपेक्षा शान्त में माधुर्य अतिशय रूप से अन्वित है। (इनमें हेतु बतलाते हैं)

अत्यन्तद्रुतिहेतुत्वात्—अत्यन्त द्रुति का कारण होने से।

अन्वय—वीररसस्थितिः (न०१.१) ओजः (न० १.१) दीप्त्यात्मविस्तृतेः (न० ६.१) हेतुः (पुं० १.१)।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



**अर्थ**—वीर रस में रहने वाला ओज दीप्तिरूप आत्मविस्तृति का कारण है।

**अन्वय**—ओजः (न० १.१) चित्तस्य (न० ६.१) विस्ताररूपदीप्तत्वजनकम् (न० १.१)

**अर्थ**—ओज (गुण) चित्त की विस्ताररूप दीप्ति का जनक है।

**अन्वय**—बीभत्सरौद्ररसयोः (पुं० ७.२) क्रमेण (पुं० ३.१) च (अ०) तस्य (न० ६.१) [ओजसः] आधिक्यम् (न० १.१)।

**अर्थ**—बीभत्स तथा रौद्र रस में क्रम से उस ओज का आधिक्य है।

**अन्वय**—वीरात् (पुं० ५.१) बीभत्से (पुं० ७.१) ततो [अपि] रौद्रे (पुं० ७.१) ओजः (न० १.१) सातिशयम् (न० १.१)

**अर्थ**—वीर की अपेक्षा बीभत्स में, उसकी (बीभत्सकी) अपेक्षा रौद्र में ओज (गुण) अतिशय रूप में स्थित है।

**अन्वय**—शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः (पुं० १.१) अन्यत् व्याप्नोति सर्वत्र (अ०) विहितस्थितिः (पुं० १.१) असौ (पुं० १.१) प्रसादः (पुं० १.१)॥

**अर्थ**—शुष्क इन्धन में अग्नि के सदृश, स्वच्छजल के समान शीघ्र ही चित्त को व्याप्त करने वाला तथा सर्वत्र रहने वाला यह प्रसाद है।

जिस प्रकार अग्नि शुष्क इंधन को शीघ्र ही व्याप्त करती है तथा जल स्वच्छ पट को सहसा व्याप्त कर लेता है उसी प्रकार प्रसाद गुण चित्त को शीघ्र ही व्याप्त कर लेता है। प्रसादगुण सभी शृङ्गारादि रसों में विहित है।

## अभिनयः

अभिपूर्वस्तु णीञ्धातुराभिमुख्यार्थनिर्णये।
यस्मात्पदार्थान्नयति तस्मादभिनयः स्मृतः॥ ६॥
विभावयन्ति यस्माच्च नानार्थान् हि प्रयोगतः।
शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः॥ ७॥

ना० शा० ८।६—७।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अन्वय—अभिपूर्वः ( पुं० १.१ ), णीञ् धातुः ( पुं० १.१ ) तु (अ०) आभिमुख्यार्थ-निर्णये ( पुं० ७.१ ) यस्मात् ( न० ५.१ ) पदार्थान् ( पुं० २.३ ) नयति तस्मात् ( न० ५.१ ) अभिनयः ( पुं० १.१ ) स्मृतः (पुं० १.१)।

अर्थ—अभि उपसर्ग पूर्वक नी धातु आभिमुख्य रूप अर्थ के निर्णय करने में समर्थ है। पदार्थों को सम्मुख लाने के कारण ही उसका अभिनय नाम से कहा जाता है।

अन्वय—यस्मात् ( न० ५.१ ) च ( अ० ) नानार्थान् ( पुं० २.३ ) हि ( अ० ) प्रयोगतः (अ०) विभावयन्ति तस्मात् ( न० ५.१ ) शाखाङ्गोपाङ्गसंयुक्तः ( पुं० १.१ ) अभिनयः ( पुं० १.१ ) स्मृतः ( पुं० १.१ ) ॥ ७ ॥

अर्थ—अनेक अर्थों को क्रियान्वित कर बोधन कराने वाला शाखा, अङ्ग, उपांग से युक्त अभिनय कहलाता है।

## पाठ्य-गुणाः

पाठ्यगुणानिदानीं वक्ष्यामः। तद्यथा सप्तस्वराः, त्रीणि स्थानानि, चत्वारो वर्णाः, द्विविधा काकुः, षडलङ्काराः, षडङ्गानि, तेषामिदानीं लक्षणान्यभिव्याख्यास्यामः।

तत्र सप्त स्वराः षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाः। एते रसेषूपपाद्या यथा—

हास्यशृङ्गारयोः कार्यौ स्वरौ मध्यमपञ्चमौ।
षडजर्षभौ तथा चैव वीररौद्राद्भूतेषु तु॥ ३८॥
गान्धारश्च निषादश्च कर्तव्यौ करुणे रसे।
धैवतश्चैव कर्तव्यो बीभत्से सभयानके॥ ३९॥
त्रीणि स्थानान्युरःकण्ठशिरांसीति भवन्त्यपि।
शारीर्यामथ वीणायां त्रिभ्यः स्थानेभ्य एव च॥ ४०॥
उरसः शिरसः कण्ठात् स्वरः काकुः प्रवर्तते।
आभाषणं तु दूरस्थे शिरसा सम्प्रयोजयेत्॥ ४१॥
नातिदूरेऽपि कण्ठेनाप्युरसा चापि पार्श्वतः।
उरसोदाहृतं वाक्यं शिरसा दीपयेद् बुधः॥ ४२॥
कण्ठेन शमनं कुर्यात्पाठ्ययोगेषु सर्वदा।

ना० शा० १९।२२१।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अन्वय—इदानीं ( अ० ) पाठ्यगुणान् ( पुं० २.३ ) वक्ष्यामः। तत् ( न० १.१) यथा ( अ० ) सप्तस्वराः ( पुं० १.३ ) त्रीणि ( न० १.३ ) स्थानानि ( न० १.३ ), चत्वारः ( पुं० १.३ ) वर्णाः ( पुं० १.३ ) द्विविधा ( स्त्री० १.१ ) काकुः ( स्त्री० १.१ ), षट् ( पुं० १.३ ) अलङ्काराः ( पुं० १.३ ), षट् ( न० १.३ ) अङ्गानि ( न० १.३ ), इदानीं ( अ० ) तेषां ( न० ६.३ ) लक्षणानि ( न० २.३) अभिव्याख्यास्यामः।

अर्थ—अब हम पाठ्यगुणों को कहेंगे। वे इस प्रकार हैं—सात स्वर, तीन स्थान, चार वर्ण, द्विविध काकु, छः अलंकार, छः अंग। अब उनके लक्षणों की व्याख्या करेंगे।

अन्वय—तत्र ( अ० ) षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाः ( पुं० १.३ ) सप्त ( पुं० १.३ ) स्वराः ( पुं० १.३ )। एते ( पुं० १.३ ) [ स्वराः ] रसेषु ( पुं० ७.३ ) उपपाद्याः ( पुं० १.३ )।

अर्थ—षड्ज, ऋषभ, गांधार, मध्यम, पंचम, धैवत तथा निषाद ये सप्त स्वर हैं। इन स्वरों का रसों में उपपादन करना चाहिये।

अन्वय—यथा ( अ० ) हास्यशृङ्गारयोः ( पुं० ७.२ ) मध्यमपञ्चमौ (पुं०१.२) स्वरौ ( पुं० १.२ ) कार्यौ ( पुं० १.२ ) तथा ( अ० ) वीररौद्राद्भुतेषु ( पुं० ७.३ ) तु ( अ० ) षड्जर्षभौ ( पुं० १.२ ) च ( अ० ) ॥ ३८ ॥

करुणे ( पुं० ७.१ ) रसे ( पुं० ७.१ ) गांधारः ( पु० १.१ ) च ( अ० ) निषादः ( पुं० १.१ ) च ( अ० ) कर्त्तव्यौ ( पुं १.२ )। बीभत्से ( पुं० ७.१ ) भयानके ( पुं० ७.१ ) धैवतः ( पुं० १.१ ) च ( अ० ) एव ( अ० ) कर्त्तव्यः ( पुं० १.१ ) ॥ ३८—३९ ॥

अर्थ—हास्य तथा शृंगार में मध्यम व पञ्चम स्वरों का, वीर, रौद्र, तथा अद्भुत रस में षड्ज व ऋषभ का, करुण रस में गांधार तथा निषाद, बीभत्स तथा भयानक में धैवत का उपपादन करना चाहिये।

अन्वय—उरःकण्ठशिरांसि ( न० १.३ ) इति ( अ० ) त्रीणि ( न० १.३ ) स्थानानि ( न० १.३ ) भवन्ति। अथ ( अ० ) शारीर्यां ( स्त्री० ७.१ ) वीणायां ( स्त्री० ७.१ ) त्रिभ्यः ( न० ५.३ ) स्थानेभ्यः ( न० ५.३ ) उरसः ( न० ५.१ ) शिरसः ( न० ५.१ ) कण्ठात् ( पुं० ५.१ ) स्वरः ( पुं० १.१ ) काकुः ( स्त्री० १.१ ) प्रवर्त्तते। दूरस्थे ( पुं०७.१ )

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



आभाषणं ( न० १.१ ) तु ( अ० ) शिरसा ( न० ३.१ ) संप्रयोजयेत् ॥ ४१ ॥

न ( अ० ) अतिदूरे ( पुं० ७.१ ) कण्ठेन ( पुं० ३.१ ) अपि पार्श्वस्थः ( पुं० १.१ ) उरसा ( न० ३.१ ) च ( अ० ) अपि ( अ० ) बुधः ( पुं० १.१ ) उरसा ( न० ३.१ ) उदाहृतं ( न० २.१ ) वाक्यं ( नपु० २.१ ) शिरसा ( न० ३.१ ) दीपयेत् ॥ ४२ ॥

पाठ्ययोगेषु ( पुं० ७.३ ) सर्वदा ( अ० ) कण्ठेन ( पुं० ३.१ ) शमनं ( न० २.१ ) कुर्यात् ।

अर्थ—उरस् कण्ठ तथा शिर ये तीन स्थान हैं। शारीरी वीणा में तीन स्थानों से अर्थात् उरस् से, शिर से तथा कण्ठ से स्वर काकु प्रवृत्त होता है। दूरस्थित व्यक्ति से सिर द्वारा निकट स्थित व्यक्ति से कण्ठ द्वारा, तथा पार्श्वस्थित व्यक्ति से उरस् से निकलने वाले वाक्यों द्वारा वार्तालाप करें। बुधजन सर्वदा पाठ्ययोग में उर से निकले हुए वाक्य को सिर द्वारा उत्तेजित करते हैं, तथा कण्ठ से स्पष्ट करते हैं।

## पाठ्ये वर्णभेदास्तत्प्रयोगाश्च; तथैव काकुः

उदात्तश्चानुदात्तश्च स्वरितः कम्पितस्तथा।
वर्णाश्चत्वार एव स्युः पाठ्ययोगे तपोधनाः ॥ ४३ ॥

तत्र हास्यशृङ्गारयोः स्वरितोदात्तैः, वीररौद्राद्भुतेषूदात्तकम्पितैः, करुण-वात्सल्यभयानकेषूदात्तस्वरितकम्पितैः वर्णैः पाठ्यमुपपादयेदिति।

द्विविधा काकुः साकांक्षा निराकांक्षा चेति वाक्यस्य साकांक्षनिराकांक्षत्वात्।

अनियुक्तार्थकं वाक्यं साकांक्षकमिति संज्ञितम्।
नियुक्तार्थं तु यद्वाक्यं निराकाक्षं तदुच्यते ॥ ४४ ॥

ना० शास्त्र १९।२२२।

अन्वय—पाठ्ययोगे ( पुं० ७.१ ) उदात्तः ( पुं० १.१ ) च ( अ० ) अनुदात्तः ( पुं० १.१ ) च ( अ० ) स्वरितः ( पुं० १.१ ) तथा ( अ० ) कम्पितः ( पुं० १.१ ) [ एते ] चत्वारः ( पुं० १.३ ) वर्णाः ( पुं० १.३ ) स्युः [ इति ] तपोधनाः ( पुं० १.३ ) कथयन्ति ॥ ४३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



**अर्थ**—पाट्ययोग में उदात्त, अनुदात्त, स्वरित तथा कम्पित ये चार वर्ण हैं ऐसा तपोवन कहते हैं।

**अन्वय**—तत्र ( अ० ) हास्यशृङ्गारयोः ( पुं० ७.२ ) स्वरितोदात्तैः ( पुं० ३.३ ) वीररौद्राद्भुतेषु ( पुं० ७.३ ) उदात्तकम्पितैः ( पुं० ३.३ ) करुणवात्सल्य-भयानकेषु ( पुं० ७.३ ) उदात्तस्वरितकम्पितैः ( पुं० ३.३ ) वर्णैः ( पुं० ३.३ ) पाठ्यम् ( नपुं० २.१ ) उपपादयेत् इति ( अ० )।

**अर्थ**—हास्य तथा शृङ्गार में स्वरित तथा उदात्त, वीर, रौद्र तथा अद्भुत में उदात्त कम्पित, करुण, वात्सल्य तथा भयानक रस में उदात्त, स्वरित तथा कम्पित वर्णों द्वारा पद को बताना चाहिये।

**अन्वय**—वाक्यस्य ( नपुं० ६.१ ) साकांक्षनिराकांक्षत्वात् ( न० ५.१ ) काकुः ( स्त्री० १.१ ) द्विविधा ( स्त्री० १.१ ) साकांक्षा ( स्त्री० १.१ ) निराकांक्षा ( स्त्री० १.१ ) च ( अ० ) इति ( अ० )।

**अर्थ**—वाक्य के साकांक्ष व निराकांक्ष होने के कारण काकु दो प्रकार की है—( १ ) साकांक्षा तथा ( २ ) निराकांक्षा।

**अन्वय**—अनियुक्तार्थकं ( न० १.१ ) वाक्यं ( न० १.१ ) साकांक्षकम् ( न० १.१ ) इति ( अ० ) संज्ञितम्। यत् ( न० १.१ ) वाक्यं ( न० १.१ ) तु ( अ० ) नियुक्तार्थं ( न० १.१ ) तत् ( न० १.१ ) निराकांक्षम् ( नपुं० १.१ ) उच्यते ॥ ४४ ॥

**अर्थ**—अनिश्चित अर्थ वाला वाक्य साकांक्ष तथा निश्चित अर्थ के वाक्य को निराकांक्ष कहते हैं।

## पाठ्ये षडलङ्काराः

उच्चो दीप्तश्च मन्द्रश्च नीचो द्रुतविलम्बितौ।
पाठ्यस्यैते ह्यलङ्काराः लक्षणञ्च निबोधत ॥ ४५ ॥

उच्चो नाम शिरस्थानगतस्तारस्वरः, स च दूरस्थाभाषणविस्मयोत्तरोत्तर-संजल्पदूराह्वानत्रासनार्थं वाद्येषु। दीप्तो नाम शिरःस्थानगतस्तारतरः, स चाक्षेपकलहविवादामर्षोत्कृष्टाधर्षणाक्रोधशौर्यदर्पतीक्ष्णरूक्षाभिधाननिर्भर्त्स-नादिषु। मन्द्रो नाम उरःस्थानगतो निर्वेदग्लानिशङ्काचिन्तौत्सुक्यदैन्यावे-व्याधिगाढशस्त्रक्षतमूर्च्छामदादिषु। नीचो नाम उरःस्थानगतो मन्द्रतरः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



स्वभावाभाषणव्याधितपथिश्रान्तत्रस्तपतितमूर्च्छितादिषु। द्रुतो नाम कण्ठगतः-स्खलितवेल्लनमदनभयशीतज्वरत्रस्तायस्तागूढकार्यवेदनादिषु। विलम्बितो नाम कण्ठस्थानगतः मन्द्रः शृङ्गारवितर्कितविचारामर्षासूयिताव्यक्तार्थप्रवादलज्जा चिन्तातर्जनविस्मयदोषानुकीर्तनदीर्घरोषनिपडीनादिषु।

ना० शा० १९।२२२

अन्वय—उच्चः ( पुं० १.१ ) दीप्तः ( पुं० १.१ ) च ( अ० ) मन्द्रः ( पुं० १.१ ) नीचः ( पुं० १.१ ) च ( अ० ) द्रुतविलम्बितौ ( पुं० १.२ )। एते ( पुं० १.३ ) हि ( अ० ) पाठ्यस्य ( न० ६.१ ) अलंकाराः (पुं० १.३) लक्षणं ( न० १.१ ) च ( अ० ) निबोधत।

अर्थ—उच्च, दीप्त, मन्द्र, नीच, द्रुत तथा विलम्बित ये पाठ्य के अलंकार हैं। इनके लक्षण इस प्रकार हैं—

अन्वय—शिरःस्थानगतः ( पुं० १.१ ) तारस्वरः ( पुं० १.१ ) उच्चः (पुं० १.१) नाम ( अ० ) सः ( पुं० १.१ ) च ( अ० ) दूरस्थाऽऽभाषणविस्मयोत्तरोत्तरसंजल्पदूरास्वानत्रासनार्थं ( न० १.१ ) पाठ्येषु ( न० ७.३ ) शिरस्थानगतस्तारतरः ( पुं० १.१ ) दीप्तः ( पुं० १.१ ) नाम ( अ० ), सः ( पुं० १.१ ) च ( अ० ) आक्षेपकलहविवादामर्षोत्कृष्टधर्षणक्रोधशौर्यदर्पतीक्ष्णरूक्षाभिधाननिर्भर्त्सनादिषु ( पुं० ७.३ )। मन्द्रः ( पुं० १.१ ) नाम ( अ० ) उरःस्थानगतः ( पुं० १.१ ) निर्वेदग्लानिशङ्काचिन्तौत्सुक्यदैन्यावेगव्याधिगाढ़शस्त्रक्षतमूर्च्छामदादिषु (पुं० ७.३)। नीचः (पुं० १.१) नाम ( अ० ) उरःस्थानगतः ( पुं० १.१ ) मन्द्रतरः ( पुं० १.१ ) स्वभावाभाषणव्याधितपथिश्रान्तत्रस्तपतितमूर्च्छितादिषु ( पुं० ७.३ )। द्रुतः ( पुं० १.१ ) नाम ( अ० ) कण्ठगतस्खलितवेल्लनमदनभयशीतज्वरत्रस्तायस्तागूढ़कार्यवेदनादिषु ( पुं० ७.३ )। विलम्बितः ( पुं० १.१ ) नाम (अ०) कण्ठस्थानगतः ( पुं० १.१ ) मन्द्रः ( पुं० १.१ ) शृंगारवितर्कितविचारामर्षासूयिताव्यक्तार्थप्रवादलज्जाचिन्तातर्जनविस्मयदोषानुकीर्तनदीर्घरोषनिपीडनादिषु ( पुं० ७.३ )।

अर्थ—शिरःस्थानगततारस्वर को 'उच्च' कहते हैं। दूरस्थित ( व्यक्ति ) से भाषण करने में, विस्मय, उत्तरोत्तर वार्तालाप में दूर से आस्वादन करने में तथा डराने में पाठ्यो में उसका उपयोग होता। शिरः स्थानगत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



तारतर स्वर को 'दीप्त' कहते हैं उसका उपयोग आक्षेप, कलह, विवाद, अमर्ष, उत्कृष्ट घर्षण ( झकझोरना ) क्रोध, शौर्य, दर्प ( अभिमान ) तीखे व रूखे भाषण तथा निर्भत्सना में होता है। उरः स्थानगत स्वर को मन्द्र कहते हैं। निर्वेद, ग्लानि, शंका, चिन्ता, औत्सुक्य, दैन्य, आवेग, व्याधि, गाढ़शस्त्रक्षत, मूर्छा मद आदि में उसका उपयोग होता है। उरः स्थानगत मन्द्रतर स्वर को 'नीच' कहते हैं। स्वभाव आभाषण,व्याधित, मार्ग का थका हुआ, डरा हुआ, पतित, मूर्छित आदि में उसका उपयोग होता है। कण्ठगत स्वर को 'द्रुत' कहते हैं। खलितवेल्लन = लडखडाने में, मदन मय, शीतज्वर, त्रस्त आयस्त, गूढ़ कार्य के जानने में द्रुत का उपयोग होता है कण्ठस्थानस्थित मन्द्र को विलंबित कहते हैं। शृंगार वितर्कित विचार, अमर्ष, असूयित, अव्यक्त अर्थ प्रवाद, लज्जा, चिन्ता, तर्जन, विस्मय, दोषानुकीर्तन, दीर्घ रोष तथा निपीडन आदि में उसका उपयोग होता है।

## पाठ्यगुणेषु अङ्गनिरूपणम्

अथाङ्गानि—विच्छेदोऽर्पणे विसर्गोऽनुबन्धो दीपनं प्रशमनमिति षडङ्गानि। तत्र विच्छेदो नाम विरामकृतः। अर्पणं नाम लीलावर्णस्वरेणापूरयदिव रङ्गं यत्पठ्यते। विसर्गो नाम वाक्यन्यासः। अनुबन्धो नाम पदान्तरेष्वविच्छेदानुच्छ्वासनं वा। दीपनं नाम त्रिस्थानशोभि वर्धमानस्वरञ्च। प्रशमनं नाम तारं गतानां स्वराणामवैस्वर्येणावतरणमिति। एषाञ्च रसगतः प्रयोगः। तत्र हास्यशृङ्गारयोरर्पणविच्छेदनदीपनप्रशमनयुक्तं *वाक्यं कार्यं करुणवीराद्भुतेषु समाकाङ्क्षाविच्छेदप्रशमनार्पणदीपनानुबन्धनबहुलं पाठ्यं प्रयोज्यं, बीभत्सभयानकयोर्विच्छेदार्पणयुक्तमिति सर्वेषाञ्चैतेषां मन्द्रमध्यतारव्यवस्थायां स्थानगतः प्रयोगः। तत्र दूरस्थाभाषणे तारशिरसो नातिदूरे मध्यं कण्ठेन पार्श्वतो मन्द्रमुरसा प्रयोजयेत् पाठ्यमिति। मन्द्रात्तारं गच्छेत्तारात्तारा मन्द्रमिति। एषाञ्च द्रुतमध्यविलंम्बितासु ये वर्णा रसेषूपपाद्या तत्र हास्यशृङ्गारयोर्मध्यलयः करूणे विलंम्बितो वीररौद्राद्भुतबीभत्सभयानकेषु द्रुत इति।

* पाठ्यं।



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



अन्वय—अथ(अ०) अङ्गानि (न० १.३)। विच्छेदः ( पु ०१.१ ) अर्पणं ( न०१.१ ) विसर्गः ( पुं० १.१ ) अनुबन्धः ( पुं० १.१ ) दीपनं ( न० १.१ ) प्रशमनम् ( न०१.१ ) इति (अ०) षट् ( न०१.३ ) अङ्गानि ( न०१.३ ) तत्र ( अ० ) विच्छेदः ( पुं० १.१ ) नाम ( अ० ) विरामकृतः (पुं०१.१) अर्पणं ( न० १.१ ) नाम ( अ० ) लीलावर्णस्वरेण ( पुं० ३.१ ) रङ्गं ( न० १.१ ) आपूरयत् इव ( अ० ) यत् ( न० १.१ ) पठ्यते। विसर्गः ( पुं० १.१ ) नाम ( अ० ) वाक्यन्यासः ( पु० १.१ )। अनुबन्धः ( पुं० १.१ ) नाम ( अ० ) पदान्तरेषु ( न० ७.३ ) अविच्छेदानुच्छ्वासनं ( न० १.१ ) वा ( अ० )। दीपनं ( न० १.१ ) नाम ( अ० ) त्रिस्थानशोभि ( न० १.१ ) वर्धमानस्वरं ( न० १.१ ) च ( अ० )। प्रशमनं ( न० १.१ ) नाम ( अ० ) तारं ( न०१.१ ) गतानां ( पुं०६.३ ) स्वराणां ( पुं० ६.३ ) अवैस्वर्येण ( न० ३.१ ) अवतरणम् ( न०१.१ ) इति ( अ० )। एषां ( पुं० ६.३ ) च ( अ० ) रसगतः ( पुं० १.१ ) प्रयोगः ( पुं० १.१ ) तत्र ( अ० ) हास्यशृङ्गारयोः ( पुं० ७.२ ) अर्पणविच्छेदनदीपनप्रशमनयुक्तं ( न० १.१ ) *वाक्यं ( न० १.१ ) ( कार्यम् ) ( न० १.१ )। करुणवीराद्भुतेषु ( पुं० ७.३ ) समाकाङ्क्षाविच्छेदप्रशमनार्पणदीपनानुबन्धनबहुलं ( न०१.१ ) पाठ्यं ( न० १.१ ) प्रयोज्यम् ( न० १.१ )।

अन्वय—बीभत्सभयानकयोः ( पुं० ७.२ ) विच्छेदार्पणयुक्तं ( न० १.१ ) इति ( अ० )। सर्वेषां ( पुं० ६.३ ) च ( अ० ) एतेषां ( पुं० ६.३ ) मन्द्रमध्यतारव्यवस्थायां ( स्त्री० ७.१ ) स्थानगतः ( पुं०१.१ ) प्रयोगः ( पुं० १.१ )। तत्र ( अ० ) दूरस्थाभाषणे ( न० ७.१ ) शिरसा ( न० ३.१ ) तारं ( न० २.१ ) न ( अ० ) अतिदूरे ( पुं० ७.१ ) कण्ठेन ( पुं० ३.१ ) मध्यं ( न० २.१ ) पार्श्वतः ( अ० ) उरसा ( न० ३.१ ) मन्द्रं ( न० २.१ ) पाठ्यं ( न० २.१ ) प्रयोजयेत्। मन्द्रात् ( पुं० ५.१ ) तारं ( पुं० २.१ ) गच्छत्, तारात् ( पुं० ५.१ ) वा ( अ० ) मन्द्रम् ( पुं० २.१ ) इति ( अ० ) एषां ( पुं० ६.३ ) त्रयः ( पुं० १.३ ) वर्णाः ( लयाः ) ( पुं० १.३ द्रुतमध्यविलम्बिताश्च ( पुं० १.३ ) रसेषु ( पुं० ७.३ ) उपपाद्याः ( पुं० १.३ )

*पाठ्यं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



तत्र ( अ० ) हास्यशृङ्गारयोः ( पुं० ७.२ ) मध्यलयः ( पुं० १.१ ) करुणे ( पुं० ७.१ ) विलम्बितः ( पुं० १.१ ) वीररौद्राद्भुतबीभत्सभयानकेषु ( पुं० ७.३ ) द्रुतः ( पुं० १.१ ) [ लयः ] इति ( अ० )।

अर्थ—अब ( पाठ्य के गुणों में से ) अंगों का वर्णन करेंगे। विच्छेद, अर्पण, विसर्ग, अनुबन्ध, दीपन, प्रशमन—ये छः अंग हैं। विच्छेद का अर्थ है विराम। सुंदर वर्णयुक्त स्वर से रंगमंच को गुंजित करते हुए जो पढ़ा जाता है उसे अर्पण कहते हैं। विसर्ग का अर्थ है वाक्यन्यास, जहाँ वाक्य का त्याग किया जाता है। पदान्तर में अविच्छेद अथवा अनुच्छ्वसन अर्थात् श्वास न लेना यह अनुबन्ध कहलाता है। त्रिस्थान ( मन्द्र, मध्य, तार ) में शोभित होता हुआ ऊपर चढ़ने वाला स्वर दीपन कहलाता है ( दीपन का प्रयोग आरोह में होता है )। तार में पहुंचे हुए स्वरों को विस्वर न बनाते हुए नीचे उतरना प्रशमन कहलाता है। इन छः अंगों का रस में प्रयोग होता है। हास्य तथा शृङ्गार में अर्पण, विच्छेद, दीपन तथा प्रशमन युक्त पाठ्य का प्रयोग करना चाहिये। करुण, वीर तथा अद्भुत रसों में सम आकांक्षा होने पर विच्छेद, प्रशमन, अर्पण, दीपन अनुबन्धन-बहुल पाठ्य का प्रयोग करना चाहिये। बीभत्स तथा भयानक रस में विच्छेद तथा अर्पण से युक्त पाठ्य होना चाहिये। इन सबका मन्द्र, मध्य व तार व्यवस्था में स्थानगत प्रयोग होता है। दूरस्थित व्यक्ति से भाषण करने में शिर से तार, निकटस्थ से वार्तालाप करने में कंठ से मध्य तथा पार्श्वस्थित से वार्तालाप करने में मन्द्र स्वर युक्त पाठ्य का प्रयोग करना चाहिये। मन्द्र से तार में अथवा तार से मन्द्र में जाना चाहिये। इन छः अंगों के जो लय द्रुत, मध्य तथा विलंबित हैं उनका रस में उपपादन करना चाहिये। हास्य तथा शृङ्गार में मध्यलय, करुण में विलंबित लय तथा वीर, रौद्र, अद्भुत, बीभत्स तथा भयानक रस में द्रुत लय का प्रयोग करना चाहिये।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

# परिशिष्टम्

१. संवाद–वैभवम्
२. गीतावली ( संगीतलिपिसंवलिता )
३. वृत्तगानपद्धतिनिर्देशः ( संगीतलिपिसमेतः )

•

# विषयानुक्रमणी

## १. संवादाः

( १ ) संगीतशास्त्राध्ययने संस्कृतज्ञानस्योपकारकत्वम्
( २ ) राग–स्वरूप–विचारः
( ३ ) गवेषण–गोष्ठी
( ४ ) अनुसन्धान–कार्य–परिचयः
( ५ ) नैराश्य–परिहारः
( ६ ) पारिभाषिक–शब्द–विमर्शः

## २. गीतानि

( १ ) 'सुरभारती जयति'—हमीर-केदार-रागः, चौताल-तालः
( २ ) 'वन्दे नादतनुम्'–देश-तिलककामोद-रागः, चौताल-तालः
( ३ ) 'नन्दसुतेन वादिता वंशी' भीमपलासी-रागः, त्रिताल-तालः

## ३. वृत्तगानपद्धतिः

( १ ) विषयावतारणम्
( २ ) अनुष्टुप्-शार्दूलविक्रीडित-स्रग्धरा-वृत्तेषु रचितानां कालिदास-मङ्गलपद्यानां गानात्मकरूपम्
( ३ ) वसन्ततिलकावृत्ते निबद्धस्य श्रीमद्भागवतान्तर्गतवेणुगीतस्य गानमयरूपम्
( ४ ) प्रमाणिका-पञ्चचामर-भुजङ्गप्रयात-त्रोटकवृत्तानां गानपद्धतिः
( ५ ) उपसंहारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

# ( १ ) संवाद–वैभवम्

## ( १ ) संगीतशास्त्राध्ययने संस्कृतज्ञानस्योपकारकत्वम्

१—संस्कृतदिवसमुपलक्ष्य आयोज्यमाने अस्मिन् उत्सवे संगीतशास्त्राध्ययने संस्कृतस्य उपयोगितामधिकृत्य किंचित् पुनरवधारणं, कोऽपि पुनर्विचारः स्वचित्तस्य दृढप्रत्ययार्थम् अस्माकं कृते परमोपकारको भवितुमर्हतीति मे मतिः। अत्रोपस्थितानां सर्वेषामनुज्ञाम् अभ्यर्थये।

२—सर्वथा श्लाघनीयोऽयं प्रस्तावः।

३—अत्र श्रोतृणामपि हितकरः प्रीतिकरश्चायं भविष्यतीतिं प्रतिभाति मे।

४—भारतस्य पूर्व-दक्षिण-पश्चिम-उत्तर-प्रदेशानां प्रतीकस्वरूपा वयमत्र तिष्ठामः। अतोऽस्माकं विचारगोष्ठीयं सार्वभारतिकी भवितुमर्हति।

१—बाढम्, भारतस्य विश्वविद्यालयानां हृदयस्यरूपं काशी-हिन्दू-विश्वविद्यालयस्थिता वयमिति खलु, सुमहदस्माकं दायित्वम्।

२—'हिन्दू' शब्दस्य रक्षार्थे कृतसंरम्भा वयं, किन्तु हिन्दू-शब्द-संश्लिष्टनामधारिणि विश्वविद्यालयेऽस्मिन् हिन्दू-शास्त्राणामध्ययनस्य, तत्र श्रद्धाया उद्भावनस्य च या महती दायित्वभावना अत्रस्थानां सर्वेषां जनानां हृदि जाज्वल्यमाना भवितुमर्हति, सा तु सुदूरपराहतैव दृश्यते।

३—नहि परचर्चाया अयमवसरः। अद्य तु स्वकीयदायित्वपालनाय चित्तस्य सर्वथा निश्चलत्वसाधनमेव अस्माकमिष्टम्।

४—अतिलघुकायेऽस्मिन् विभागे अङ्गुल्यग्रगण्या ये केचिद् वयं स्थिताः, तेषां तासां वा स्वकर्तव्यावधारणमेव अस्या गोष्ठ्याः प्रयोजनम्। आकारलाघवात् यदि अत्रस्थानां केषामपि चित्ते किमपि शैथिल्यं, कापि दीनता गन्धमात्रेणापि स्थिता स्यात्, तर्हि तस्या उन्मूलनमपि स्वत एव भविष्यतीति मत्वा स्वसंकल्पस्य दृढता एव साधनीया।

१—अन्धकारस्य तिरस्कारोपेक्षया आलोकस्य वरणमेव वरेण्यम्। भावात्मकसाधनेन अभावस्तु स्वत एव विलीयते, विधेः पालनेन निषेधस्य अपेक्षाऽपि दूरीभवति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



२—नाम-मात्र-स्मृति-शेषाणां भरत-मतङ्ग-अभिनव-शार्ङ्गदेव-प्रभृति-मनीषिणां विषय-प्रतिपादनं प्रत्यक्षं तेषामेव वाण्यामधीत्य तेषां हार्दस्य अवधारणमस्माभिः सर्वप्रथमं कर्तव्यम्।

३—तत्तु भवतु नाम, किन्तु अद्यतनीयलक्ष्यम् उररीकृत्य प्राचीन-मध्ययुगीन-शास्त्राणां प्रतिपाद्यविषयस्य अर्थनिर्णयो व्याख्या वा कर्तव्या, न तु लक्ष्यम् उपेक्ष्यैव।

४—सत्यम्, किन्तु तत्र महद्भयस्थानमेकं वर्तते।

१—किं तत्?

४—प्राचीनानां हृदगताभिप्राये प्रवेशोऽस्माकम् अवरुद्धोऽपि भवितुमर्हति यदि तेषां सम-कालिकं लक्ष्यम् अद्यतनं लक्ष्यं च अभिन्नं मत्वा तत्र प्रयत्नः क्रियेत।

४—सर्वथा सत्यम्। दृष्टर्निर्मलीकरणं तु अत्यावश्यकम्। परन्तु तत्र दिव्याञ्जनं कुत्र लभेमहि?

२—प्राचीनानां हृदि प्रवेशं लब्धुकामैः सर्वप्रथमं, तेषामेव शब्दानामाश्रयणं कर्तव्यम्। स्वकीय-पूर्वनिश्चितधारणाभ्यो मनो मुक्त्वा तेषां वचसा-मालोके एव अर्थस्यान्वेषणम् उचितम्।

३—अहो महिमा संस्कृतशब्दानाम्। तत्र व्युत्पत्तिनिमित्तं प्रवृत्तिनिमित्तं चेत्युभयमपेक्ष्य अर्थनिर्धारणं सुफलदायकम्।

४—सत्यमेव संस्कृतशब्दानाम् अपूर्वा कापि माधुरी, सुमहत् किंचिदर्थ-गाम्भीर्यं, निर्मलदृष्ट्या आविष्करणीयं किमपि सारगर्भत्वं, बुधजनैक-गोचरः कोऽपि चमत्कारः। एते सर्वे गुणाः संगीतशास्त्रेऽपि भृशम् उपलभ्यते।

१—शब्देष्वेव संगीतस्य दर्शनं, इतिहासः वैचित्र्यं च निहितम् अस्माकं मनीषिभिः। एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः कामधुग् भवतीति पतञ्जलिमुनेरुक्तिः अस्माकं संगीतशास्त्रे सर्वथा समीचीनेति अनुभूयते अस्माभिः।

२—शब्दानामर्थ-विवेचनं यदि सुष्ठु साधितं स्यादस्माभिस्तर्हि शास्त्रगत-रहस्यानां कुंजिका सुलभा भविष्यतीति नास्त्यत्र सन्देहस्यावसरः।

३—संगीतशास्त्रगतशब्दभाण्डारस्य त्रिविधा गतिः दृश्यते। केऽपि शब्दा अर्थपरिवर्तनं विना अधुनाऽपि प्रचलन्ति। यथाहि, स्वर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



राग-ताल प्रभृतयः। केऽपि शब्दा भिन्नार्थे प्रचलन्ति। यथा हि, वादि-संवादि-विवादि-अनुवादि-ग्रह-अंशप्रभृतयः। केऽपि सर्वथा लुप्ताः। यथा हि स्थाय-गीति-धातु-करण-प्रभृतयः।

४—यथार्थेयम् उक्तिः। तत्र येषु शब्देषु अर्थपरिवर्तनं बाह्यदृष्ट्या न दृश्यते तत्रापि व्युत्पत्तिनिमित्तस्य प्रवृत्तिनिमित्तस्य च बोधेन नवीनम् अर्थज्ञानं भवितुमर्हति। 'वादन' शब्दो वाद्यशब्दो वा प्राचीनाभिन्नार्थे प्रचलति। किन्तु तत्र 'वद' धातोर्णिजन्त-प्रयोगेण स्वयं वदनं न कृत्वा वाद्ययन्त्रद्वारा वादनमभिप्रेतम्।

१—अहो कियान् अस्माकं कार्यभारः। प्रचलित-संस्कृत-शब्दानां व्युत्पत्ति-प्रवृत्तिनिमित्तापेक्षया अर्थान्वेषणं, तत्र अर्थपरिवर्तनस्य स्वरूप-निर्धारणं, लुप्तशब्दानामुद्धारः, प्रचलितदेशजशब्दानामुचितस्थान-निर्धारणं च।

२—किं बहुना, अस्मिन् गुरुतरे कार्ये संस्कृत-भाषाज्ञानमनिवार्यरूपेणावश्यक-मिति एव अद्यतनः प्रकृतो विषयः, इयमेव प्रस्तुता वार्ता।

३—अर्थसंकोच-अर्थविस्तार-अर्थविपर्यय-अर्थलोपप्रभृतिभिः दुरवगाह-कान्तारभूते शब्दसमूहे नवीनपथनिर्माणं सुदुष्करमेव।

४—किन्तु नहि तत्र नैराश्यस्य पराभवस्य वा औचित्यम्।

१—उत्साहं धारयन्तः,

२—श्रद्दधानाः सन्तः,

३—तप आचरन्तः,

४—सत्यान्वेषणपथि चरिष्यामः। तत्रैकोऽपि चरणक्रमः संतोषावहो भविष्यति। इति शम्।

## ( २ ) रागस्वरूपविचारः

१—रागो हि नाम उज्ज्वलतमं रत्नं भारतीयसंगीतपद्धतेः। तदद्य रागमधिकृत्य काऽपि शास्त्रीय-चर्चा प्रवर्तताम् अस्यां गोष्ठ्याम्।

२—रागशब्दस्य अर्थद्वयं सुविदितं, रंजकता, स्वरसन्निवेशश्च। प्रथमार्थे—शब्दस्यास्य प्रयोगो नाट्यशास्त्राद् उदाहरामि—'यस्मिन् वसति रागस्तु यस्माच्चैव प्रवर्तते'।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



स्वरसन्निवेशरूप–रागशब्दस्य साङ्गोपाङ्ग-प्रयोगो मतङ्गस्य बृहद्देश्यां सर्वप्रथमं दृश्यते।

३—उक्तं च मतङ्गेन :—

रागमार्गस्य यद्रूपं यन्नोक्तं भरतादिभिः।
रागस्य सामान्यलक्षणमपि तत्रैव सर्वप्रथममुपलभ्यते। यथा—

"योऽयं ध्वनिविशेषस्तु स्वरवर्णविभूषितः।
रञ्जको जनचित्तानां स रागः कथितो बुधैः"॥

४—रागद्वेषस्य द्वन्द्वं तु सुविदितमेव। यः स्वरसन्निवेशः चित्तं रञ्जयितुं समर्थः, यो वा श्रोतृचित्तं भावविशेषे निमज्जयितुं प्रभवति स एव रागशब्दवाच्यः। रागद्वेषस्य द्वन्द्वात् चित्तस्य मोचको हि सः।

१—बाढम्, सत्यमुक्तं भवद्भिः। राग-शब्दस्य प्रेमार्थम् अधिकृत्य बहु शोभनमुक्तंनृपतिकुम्भेन। तस्य श्रावणे लुब्धं मे मनः।

भवानीपादपद्मानुरागरञ्जितचेतसा।
क्रियते राजराजेन विशुद्धा रागपद्धतिः॥
यो विरागी स्मृतः कामविकामीकरणे बुधः।
तं रागिणं गिरिसुतावदने नौमि शंकरम्॥
रागो रामाश्रयत्वेन, वर्धते प्रायशो यतः।
ततो मे वर्धतामेष, रागो रामाश्रयः सदा॥

२–अहो कियात् चमत्कारो यमकस्य। साधु, साधु। स्वरसन्निवेशस्य विशिष्टत्व–व्यंजनाय प्रेम-वर्ण-प्रभृति-विभिन्नार्थ-समन्वितो रागशब्दः प्रयुक्तो मनीषिभिः चिरन्तनैः।

३—स्वरसन्निवेशे वैशिष्ट्यस्य आधानं भवति ग्रह-अंश प्रभृतिभि-र्दशलक्षणैः त्रयोदशलक्षणैर्वा।

४—रागस्य नादमयं देवतामयं चेति रूपद्वयं कल्पितमस्माकं शास्त्रेषु। तत्र देवतामयरूपस्य निरूपणे तन्त्रस्य प्रभावः सुस्पष्टं परिलक्ष्यते।

१—स तु परिलक्ष्यते एव। पाश-खड्ग-अंकुशप्रभृत्यायुधानां यान-वाहन–वर्ण-प्रभृतीनां च तत्र ग्रहणेन तान्त्रिकपद्धत्यनुसारिणी उपासना एव सूचिता।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



२—अहो भवद्भ्यां तु रागध्यानस्य महान् विषयोऽस्माकं स्मृतिपथम् आनीतः। यथा तान्त्रिकपद्धत्यनुसारीणि रागध्यानानि सुविपुलानि उपलभ्यन्ते तथैव नायक-नायिका-भेदानुसारीणि अपि बहुलानि दृश्यन्ते। सुविस्तरोऽयं रागध्यानस्य विषयः।

३—अहो, रागध्यानस्य नामश्रवणमात्रेण भैरवरागस्य ध्यानमारोहति मम स्मृतिपथम्।

गङ्गाधरः शशिकलातिलकस्त्रिनेत्रः
सर्पैर्विभूषिततनुर्गजकृत्तिवासः ।
भास्वत्त्रिशूलकर एष नृमुण्डधारी,
शुभ्राम्बरो जयति भैरव आदिरागः।

किन्तु समयसांकर्येण बिभेति मे मनः। विपुलकार्यभरावनता अत्रत्याः सभासदः।

४—सत्यम्। अपरं कमप्यवसरमवलम्ब्य रागध्यानमधिकृत्यैव एका गोष्ठी योजनीया। अद्य तु रामरक्षा-स्तोत्रस्य उपान्त्यपद्यस्य आदर्शानुसारेण निर्मितं रागस्तुतिपरं पद्यमेकं श्रावयितुमिच्छामि। तदनन्तरं गोष्ठ्या विसर्जनं भवतु इति सुष्ठु प्रतिभाति मे।

१—तदेव भवतु नाम।

४— रागो रञ्जनकुन्मुदा विजयते, रागं हि याचे सदा
रागेणैव कृतं मनः सुविमलं, रागाय तस्मै नमः।
रागान्नास्ति सुगायनं परतरं, रागस्य सेवी न्वहं
रागे चित्तलयः सदा भवतु मे, भो राग! मां रञ्जय॥

## ( ३ ) गवेषण—गोष्ठी

१—अद्य खलु महानन्दस्य अवसरः समुपस्थितः। अनेके संस्कृतानुरागिणः संगीतानुरागिणश्च सामाजिकाः अत्र समवेताः। अस्मिन् सहृदय-समाजे अस्माकम् अनुसन्धानकार्यस्य किञ्चिद् विवरणं यदि प्रस्तूयेत तर्हि संस्कृतदिवसस्य अनुष्ठानम् इदं सुष्ठुतरं भवितुमर्हतीति मन्ये। किं तत्र भवतां भवतीनां च अनुज्ञा वर्तते वा न वा?

२—कोऽत्र सन्देहः। अस्माकम् अनुसन्धानकार्ये संस्कृतभाषाज्ञानस्य कियदुपयोगित्वं तत्तु अनेनैव विवरणेन प्रकटीकृतं स्यात्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



३—बहु शोभनम्। अत्रास्माकं कार्यविवरणस्य अवतारणेऽत्र प्रस्तोता कः भविष्यति ?

४—अत्रभवती ( इन्द्राणी देवीं प्रति निर्देशयन्ती ) एव प्रस्तोत्री स्यादिति मम मतम्।

५—बाढम्।

१—तदेव भवतु नाम। 'आज्ञा गुरूणामनुल्लङ्घनीया'। अत्रभवत्याः अनुसन्धान—कार्यस्य विषयनिर्देशाय एव सर्वप्रथमम् अनुज्ञां याचे।

४—तथास्तु।

१—अत्रभवती मुसलगाँवकरोपाधिधारिणी विमलादेवी अस्मिन् विभागे संस्कृताध्यापिकारूपेण नियुक्ता। संगीतशास्त्रे विभिन्नदर्शनशास्त्राणां योगदानमिति विषयमधिकृत्य अत्रभवती अनुसन्धानकार्ये संलग्ना।

२—अहो महान् गम्भीरोऽयं विषयः। अत्र किञ्चित् श्रोतुं समुत्सुका इयं सभा इति प्रतिभाति मे।

४—संगीतशास्त्रे योगस्य तन्त्रस्य च विपुलः प्रभावो दृश्यते। तत्र नाद-महिमा, आहतानाहतनादभेदौ, पिण्डे आहतनादस्य उत्पत्तिक्रमः, षट्-चक्र—वर्णनम्, स्वराणां वर्ण-द्वीप-बीजाक्षरेत्यादि—निरूपणम्, राग-रागिणीनां देवतामयरूपस्य ध्यानपद्धतिः इत्यादिरूपेण हठयोगस्य तान्त्रिकोपासनायाश्च समावेशो भूरितरमुपलभ्यते।

३—तत्र वैदिकविचारधाराया; कोऽपि अवशेषो वर्तते वा न वेति ज्ञातुं कुतूहलाविष्टं मे मनः।

४—स तु वर्तते एव। स्वराणामृषिदैवतच्छन्दसां निर्देशः, मूर्च्छना—तानानां यज्ञनामानि, सृष्टिक्रमनिरूपणम्, वाक्-प्राण-मन-इतिकरणत्रयस्य स्वीकारः इत्यादिरूपेण वैदिक-सरणेः अनुसरणं सुस्पष्टमेव।

५—आम्।

१—साङ्ख्य—पूर्वमीमांसा—उत्तरमीमांसादिदर्शनानां संगीतशास्त्रे किमपि स्थानं दृश्यते वा न वा इति श्रोतुं समुत्सुका वयम्।

४—त्रिगुणसिद्धान्तः, सर्वविषयेषु बहुशो भेदोपभेदगणनं च सांङ्ख्य-दर्शनस्यैव प्रभावं द्योतयतः; पूर्वमीमांसातो दृष्टादृष्टफलस्य विचारः, उत्तरमीमांसातो जीवब्रह्म—निरूपणम् इत्यादिरूपेण ऐतेषां दर्शनानां योगदानं भृशम् उपलभ्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



५—एवम् ।

१—अत्रभवती कालविष्टोपाधिधारिणी विद्यादेवी सुस्वरा संस्कृतज्ञा च । भरत-नाट्यशास्त्रे गान्धर्वनिरूपणपरस्य अध्यायषट्कस्य विश्लेषणं व्याख्यां च अधिकृत्य अनुसन्धाने व्यापृता अत्रभवती ।

२—अहो । अतिदुरूहमिदम् अनुसन्धानकर्म ।

३—सत्यं भणितं भवता । नाट्यशास्त्रस्य सूत्रात्मिकया रीत्या, तद्व्याख्यातृणामभिनव-गुप्त-पादानां च व्याख्यायाः पाठभ्रंशेन कान्तारभूते ग्रन्थे अर्थावबोधाय पथनिर्माणं अतिशयदुष्करमिति स्वानुभवेन जाने ।

४—तत्तु दुरूहत्वं ममापि अनुभवपथम् आगतम् ।

१—दुरवगाहस्य ग्रन्थस्यास्य अध्ययने यावत्परिश्रमः अपेक्षितः, तस्य तुल्य-परिमाणेन साफल्यं भवितुमर्हति वा न वेति प्रश्नेन आकुलितं मे मनः ।

२—सर्वथा अयुक्तीऽयं प्रश्नः ।

३—नहि प्रश्नः कोऽपि दोषावहः ।

४—प्रश्नविमर्शेन तु स्वचित्तस्य दृढतैव साधनीया । ततो हेतोः प्रश्नानां सदैव स्वागतं विधेयम् ।

५—एवमेव ।

३—भरतनाट्यशास्त्रस्याध्ययनं तु संगीतशास्त्रस्य गम्भीरालोचने भित्ति-स्वरूपम्; भित्तिं विना न कोऽपि प्रासादो निर्मितो अद्यावधि केनापि ।

४—केवलं महिमख्यापनेन न हि किमपि सिद्ध्यति ।

३—महिमख्यापनाय नास्ति कोऽपि संरम्भोऽत्र । किन्तु स्वर—श्रुति—ग्राम—मूर्च्छना-रागजननी—जाति-गीतक-ध्रुवा-वाद्यभेद—इत्यादिविषये मौलिक-चिन्तनस्य यो निर्यासो नाट्यशास्त्रे उपलभ्यते तस्यावगमार्थं कृतपरिश्रमाः न कदापि नैराश्यं वैकल्यं वानुभवितुमर्हन्ति ।

५—सत्यम् ।

३—नाट्यशास्त्रे प्रवेशद्वारमुद्घाटयन्ती अभिनवभारती पाठभ्रंशदोषेण यद्यपि अंशमात्रेणैव अवगम्यते तथापि तदर्थं कृतः परिश्रमः महते लाभाय एव भवितुमर्हति ।

१—सुष्ठु । भवत्याः कठोर-परिश्रमेण संगीतशास्त्रे अन्वेषणक्रमः समृद्धि-मवाप्स्यति इति अस्माकं दृढा आशा । अत्रभवान् रामनाथन् महोदयः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



तिरुपति–स्थितात् बेङ्कटेश्वर-विश्वविद्यालयात् स्नातको भूत्वाऽत्र आगतः। साम्प्रतं संगीतरत्नकारे गीतनिरूपणस्य संशोधने व्यापृतोऽत्र-भवान्।

३—सर्वथोपयोगी ह्ययं विषयः।

२—संगीतरत्नाकरस्तु रत्नानामाकर एव।

४—गीतशब्देन कोऽर्थः अवबुध्यते भवता ?

२—सामान्यरूपेण गीतशब्देन कण्ठे गायन–व्यापारः तद्व्यापारस्य विषयो वा गृह्यते, किन्तु शास्त्रीयरूपेण गीतशब्दः स्वर-ताल-पदात्मके गान्धर्वे स्वरांशस्य मुख्यतया बोधकः। गौणरूपेण पदांशोऽप्यस्मिन् समाविष्टः।

३—एवम्। तर्हि गीतनिरूपणं संगीतरत्नाकरस्य स्वराध्याये, रागाध्याये, प्रकीर्णकाध्याये, प्रबन्धाध्याये च उपलभ्यते।

२—सत्यम्। इदम् अध्याय-चतुष्टयमेव ममाध्ययनस्य गोचरम्।

४—संगीतरत्नाकरस्य स्वराध्यायस्य द्वितीये प्रकरणे पिण्डोत्पत्तेर्यन्निरूपणं दृश्यते तत्तु सर्वथैव विलक्षणम्।

२—बाढम्। तत्र तु वेदान्तानुसारेण ब्रह्म-जीव-सृष्टिनिरूपणम्, आयुर्वेदानु-सारेण च मनुष्यदेहस्य गर्भाधानादारभ्य विकासक्रमवर्णनं तस्याङ्गो-पाङ्गनिरूपणं च संगीतरत्नाकरस्य अनन्य वैशिष्ट्यम्।

५—अतिशयरोचकोऽयं विषयः।

१—शीतलोपाधिधारिणी श्रीमती भूपेन्द्रमहोदया सुशारीरी सुगायनी च। अत्रत्ये महिला-महाविद्यालये संगीतप्राध्यापिकापदे नियुक्ता सती भारतीयसंगीते भातखण्डेमहोदयस्य अवदानस्य मूल्याङ्कनमधिकृत्य गवेषणकर्मणि संलग्ना अत्रभवती।

२—सर्वथा आधुनिकोऽयं विषयः।

४—आधुनिके सत्यप्यस्मिन् विषये गवेषणसौष्ठवाय अत्रापि संस्कृतज्ञान-मपेक्ष्यते एव।

५—सत्यम्।

३—वर्तमानयुगे भारतीयसंगीतस्य शिक्षणक्रमे शास्त्रीयाध्ययनक्रमे च भातखण्डेमहोदयानां अवदानं तु सुविदितमेव।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



५—किन्तु भातखण्डेमहोदयस्य कृतित्वं निन्दायाः प्रशंसाया वा पात्रं जातम् अद्यावधि। निष्पक्षरूपेण तस्याध्ययनमेव मम प्रयोजनम्।

४—आम्, सम्यग ज्ञातमधुना। ( इन्द्राणीमवलोक्य ) भवत्याः कार्य-विवरणमेव साम्प्रतम् आकांङ्क्षितम् अस्माकम्।

३—( इन्द्राणीमवलोक्य ) अत्रभवत्याः परिचयस्तु ( विमलादेवीं निर्देश्य ) भवत्या एव कथनीयः।

४—चक्रवर्तीत्युपाधिधारिणी इन्द्राणी महोदया सितारवादने कुशला, वादन-विषये स्नात्तकोत्तरोपाधिनाऽलंकृता च। भारतीयसंगीतपद्धत्यां स्वरस्य रागस्य च शास्त्रीयप्रतिपादनस्य विकासक्रमे वाद्यानां योगदानस्या-विष्करणमेव भवत्या साध्यम्।

२—अतीवगरिष्ठोऽयं विषयः।

१—सत्यम्। सारिकायुक्तेषु, सारिकाविहीनेषु च ततवाद्येषु, एवमेव सुषिर-वाद्येष्वपि ग्राम-मूर्च्छनापद्धतिः कथं व्यवहृता आसीत्, तत्पद्धते-रुच्छेदकाले च वाद्येषु किं किं परिवर्तनं जातं, रागाणां मार्गदेशीरूपेण विभाजनं वाद्यैः सह कथं सम्बद्धम् इति प्रश्नत्रयमेव मुख्यरूपेण मम गवेषणगोचरम्।

३—किन्त्वत्र निर्भ्रान्तोत्तर-लाभस्तु सुदुष्कर एव।

१—सुदुष्करत्वं हि नैवात्र पराभवस्य कारणम्।

२—बाढम्। प्रभूतेन तपसाऽत्र सत्योपलब्धिः स्यादेव।

४—वाद्यानामितिहासस्तु वैदिककालात् प्रारभ्य सुदीर्घकालव्यापकः।

१—एवमेव। अध्ययनक्षेत्रस्य मम विपुलविस्तरस्तु कालेन देशेन च सिद्धः।

३—भवत्याः प्रयाससाफल्य-कामा वयम्।

१—अनुगृहीताऽस्मि। किन्तु अस्माकं गम्भीर-वार्तालापेन सभा इयं श्रान्ता इव प्रतिभाति।

२—एवमेव। तर्हि श्रमापनोदनाय अपरं किमपि गानादिकं भवतु नाम।

सर्वे—तदेव भवतु, तदेव भवतु।

## ( ४ ) अनुसन्धान-कार्य-परिचयः

१—अहो! धन्योऽयं कालः। एकवर्षानन्तरं पुनरेकवारम् अस्मिन् रङ्गे सम्मिलिता वयम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



२—किन्त्वत्रान्तरे बहूनि परिवर्तनानि घटितानि अस्माकं शोधकक्षे।

४—तानि तु घटितान्येव। स्वामिनिजबोधमहाभागाः सेवातः अवकाशं लब्ध्वा साधनारताः; शृङ्गिमहोदयास्तु विश्वविद्यालयानुदानायोगस्य विशिष्टयोजनायां संलग्नाः, तत्पदं च गिरिमहोदया अलंकुर्वन्ति।

३—एवमेव।

१—सत्यम्। किन्तु एता घटनाः अस्यै सभायै कथं रुचिकरा भवेयुः?

३—युक्तमुक्तं भवद्भिः।

४—तर्हि सदोरञ्जनाय किं कर्तव्यम्?

१—सदसो रञ्जनं स्याद् वा न वा, किन्तु शोधकक्षेऽस्मिन् किं किं कार्यं सम्पद्यते, तस्य स्वल्पोऽपि परिचयः अत्रोपस्थितानां समेषां कुतूहल-निवारणाय प्रभविष्यति।

२—तदेव भवतु, नाम।

१—अत्रभवानेव शुभारम्भं विदधातु।

२—बाढम्। अप्रकाशित-संगीत-ग्रन्थानां मूलप्रतीनां प्रतिलिपीनां वा संग्रहः, तेषां विषयवस्तुविश्लेषणं च इति प्रथमम् अङ्गम् अत्रत्यस्य कार्यसमूहस्य।

१—एवमेव। तत्र विषयवस्तुविश्लेषणे प्रकाशितग्रन्थाः अपि समाविष्टाः। विश्लेषणस्य मुख्यप्रकारस्तु शब्दसूचीनिर्माणम्।

४—भरत-नाट्यशास्त्रस्य समग्रा शब्द-सूची निर्मिताऽस्माभिः।

२—अत्राधुनिकग्रन्था अपि न अनाद्रियन्ते। भातखण्डे-महोदयस्य हिन्दुस्तानीसंगीतपद्धतेरपि शब्दसूची प्रस्तुता।

३—अत्रभवान् विश्वविद्यालयानुदानायोगस्य योजनायां कस्मिन् कर्मणि रताः? (शृंगिमहोदयं निर्दिश्य) इति श्रोतुं लालायितं मे मनः।

१—अहो अन्यत्कार्यविवरणस्य पूर्णतायाम् असंपन्नायामेव अयं प्रश्नः उपस्थापितो भवद्भिः।

४—किं तत्रानौचित्यम्?

३—विश्वविद्यालयानुदानायोगस्य योजनान्तर्गतं कार्यं तु शोधकक्षस्यास्य गरिमवर्धनायैव प्रभवितुमर्हति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



२—सुष्ठु ! तर्हि कथयामि संक्षेपेण । संगीतरत्नाकरस्य आंग्लभाषायाम-नुवादपरमिदं कार्यम् ।

३—एवम् ।

१—केवलम् अनुवादमात्रमांग्लभाषाविदां बोधाय अलंभविष्यति वा न वेत्यत्र शङ्कितं मे चित्तम् ।

२—अर्थावबोधाय तु सुविपुलाः टिप्पण्यः, व्याख्यापरा टीका च आंग्ल-भाषायामेव निवेश्यन्ते ।

३—आम् ।

४—( भट्टमहोदयम् प्रति अवलोक्य ) संगीतविषयाणां प्रकाशिताऽप्रकाशित-संस्कृतग्रन्थानां या बृहती सूची भवद्भिर्निर्मिता सा तु विस्मृतैव ।

१—न ह्यत्रैकैकस्य कार्यस्य वर्णनं प्रतिज्ञातम् । द्वित्राणि उदाहरणानि एव बुधजनानां दिक्सूचने समर्थानि ।

२—सत्यम् । किन्तु अत्र सम्पन्नस्य, सम्पद्यमानस्य, सम्पत्स्यमानस्य च कार्यकलापस्य का उपयोगिता इति विषये किञ्चिदवश्यं वक्तव्यम् ।

३—इदं हि अति सुन्दरं प्रतिभाति मे ।

१—भारतीयसंगीतशास्त्रे अनुसन्धानकर्मणः प्रस्तावनस्वरूपमिदं सर्वम् । गम्भीरानुसन्धानार्थं सहायिका सामग्री प्रस्तूयते अनेन ।

२—सा च प्रस्तूयते एव । अत्रत्यविभागस्थाः शोधच्छात्राः, देशान्तरादागता अनुसन्धित्सवश्च अनया सामग्र्या उपक्रियन्ते इति स्वानुभवेन जानीमहे ।

४—सुष्ठु भणितं भवद्भिः । किन्तु अधुना भाविकार्यक्रमाय अवकाशो देय इति मन्ये, यतो हि विपुलकार्यभरावनतः अस्माकं श्रोतृसमाजः ।

सर्वे—अवश्यं देयः अवकाशः ।

## ( ५ ) नैराश्य-परिहारः

१—हा धिक् ! किं करोमि ? क्व यामि ? का मे गतिः ?.....खण्डितः पाठोऽध्येयग्रन्थानां, दुरूहं तात्पर्यम्, लुप्तप्राया च लक्ष्येण सह संगतिः । एतेषामध्ययने मस्तकभञ्जनं विहाय यदि गानस्याभ्यासमात्रम् अकरिष्यम्, अद्य प्रभृत्यपि कुर्यां वा, तर्हि प्रमोदावहं साफल्यं,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



लोकरञ्जनं, कीर्त्तिः, अर्थलाभः—सर्वमेव अञ्जसा करतलगतं स्यात्। किन्तु·····प्रारब्धयोगेन निपतिताऽस्मि घोरेऽस्मिन् दुस्तरसागरे। 'इतो नष्टस्ततो भ्रष्टः'—इत्येव मे शोचनीया दशा। कं पृच्छामि ? कं वा शरणं गच्छामि ? को वा ममावस्थाम् अवगमिष्यति ?

( प्रविशन्तं कमपि महापुरुषं साश्चर्यं पश्यति )

२—वत्से ! कथम् उद्विग्नाऽसि ?

१—( ससम्भ्रमम् ) आर्य ! को भवान् ऋषिकल्पः। वात्सल्यं स्रवन्निव, ज्ञानगौरवं व्यञ्जयन्निव, सौम्यत्वालोकं विकीर्णयन्निव, सुधावर्षिण्या गिरा कर्णकुहरमापूरयन्निव, गाम्भीर्यस्य सीमेव, आचार्य-पदस्य महिमेव, दर्शनमात्रेण हृदयम् आह्लादयन्निव, ममाकुलताहरणाय अवतीर्णो देवतात्मा इव प्रतिभाति ? आत्मपरिचयज्ञापनाय प्रसीदतु मयि भवान्।

२—बालिके ! येषां नाम-जन्म-कर्म-देशादिपरिचयः आकलनयोग्यतामतीत्य स्थितः, येषां च कुलादिगतविशेषम् आगमसम्प्रदायधारायामेव विलीनं, तेषामेव विगलिताशेष-विशेषाणां, प्रज्ञामात्रशरीरिणां, प्रतिभामात्रोपजीविनाम् अन्यतमोऽहम् एतावन्मात्रमलं ममात्मपरिचयख्यापनाय।

१—प्रणताऽस्मि आर्य ! प्रथमदर्शने सम्भ्रमवशेन मूढमतेर्मम प्रणतिनिवेदने त्रुटिर्जाता। तत् क्षम्यताम्।

२—वत्से ! बालानामपराधे दृष्टिनिक्षेपाद् विरता एव गुरुजनाः। आचारदोषस्य ग्लानिं विहाय तव क्लेशस्य कारणमेव कथय सद्यः।

१—हा कष्टम् ! आर्य ! घोरे कर्मणि नियोजिताऽस्मि दैवदुर्विपाकेन।

२—किं तत् ?

१—भरतमुनेर्गान्धर्व-प्रतिपादनमधिकृत्य पीएच. डी. त्युपाधिकृते शोधप्रबन्धलेखने प्रवृत्ताऽहम्।

२—तत्तु परमसन्तोषावहम्। तत्र कष्टस्य का कथा ?

१—आर्य ! अभिनवगुप्तपादानां विवृतिं विना भरतनाट्यशास्त्रमतीव दुर्बोधम्। विवृतिश्च पाठभ्रंशेन दुरूहा।

२—एवम् ? यदि सम्यक्पाठोद्धारार्थम् अप्राप्या सामग्री, तर्हि यावानेव पाठ उपलभ्यते तावतैव कार्यनिर्वाहः साधयितव्यः। 'सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः' इति न्यायेन।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



१—किन्तु, तत्र गुरुतरः परिश्रमोऽपेक्षितः। तस्माच्च बिभेमि।

२—अयि मुग्धे! कृतपरिश्रमाणामेव शास्त्रमर्मावबोधो जायते, इति कथं विस्मृतं त्वया!

१—परिश्रमे कृतेऽपि तेन किं सेत्स्यते, सिद्धेऽपि यत्किञ्चिदर्थे को वा तस्य महिमानं ज्ञास्यति इत्यत्र भ्रान्ता मे मतिः।

२—'बुद्धिनाशात् प्रणश्यति' इति गीतावचनं स्मारं स्मारं व्यवसायात्मिका बुद्धिरेव साधनीयाऽऽदौ।

१—तां तु कुत्र लभेय आर्य! न हि सा आपणे विक्रीयते।

२—बाढम्। स्वधर्मप्रत्यय एव तस्या जन्मस्थानम्। युक्तायुक्तविवेक एव तत्र क्रययोग्यता, अध्यवसाय एव तत्र मूल्यम्।

१—सत्यं कथयत्यार्यः। स्वधर्मस्य निर्णये जाते तु बुद्धिनाशस्य आशङ्काऽपि सुदूरपराहता स्यात्। किन्तु को मे स्वधर्मः?

२—संस्कृतभाषा यया अधीता, गान-कौशलमपि यया ऽजितं तस्याः स्वधर्मस्तु हस्तामलकवत् सुस्पष्ट एव।

१—एवमार्य?

२—अथ किम्? शास्त्रगतार्थानां सम्यगवबोध एव साधनमृष्यृणान्मुक्तेः। तत्रार्जिताधिकाराणां स्वधर्मस्तन्मुक्तिसाधनमेव।

१—सुदुष्करेऽस्मिन् कर्मणि कथमुत्सहे आर्य! उपयुक्तं सम्बलं विना?

२—किं ते गुरवो नो समर्था सम्यगावलम्बनप्रदाने?

१—सामर्थ्ये तु नहि संशयावकाशः, किन्तु कर्मबाहुल्येन अस्माकमाचार्या स्वल्पकालपर्यन्तमेव प्रतिदिनमध्यापनार्थमवकाशं लभते। विपुलो हि शास्त्रवारिधिः, मितो हि आचार्यसकाशाद् अध्ययनस्य कालः। कथं पारं गमिष्यामीति विचिन्त्य आकुलमतिरहम्।

२—आचार्यस्य कर्म तु चक्षुरुन्मीलनमेव। नहि करं गृहीत्वा नयनानयनम्। उन्मीलितदृष्टिना जिज्ञासुना स्वयमेव पुष्पफलाहरणार्थं शास्त्रोपवने सञ्चरितव्यम्।

१—सम्यग्भणितमार्येण। परावलम्बनं विहाय स्वावलम्बनसाधने प्रवृत्ता भविष्यामि। किन्तु.....संगीतशास्त्रविभागाद् बहिः सामान्यलोके नहि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



कोऽपि गवेषणकर्मण्यस्मिन् प्रेरयति अस्मान्। उत्साहवैरल्येन मन्दोद्यमाऽहमार्य!

२– लोकात् प्रोत्साहनस्याशैव त्याज्या। किं न जानासि यन्महर्षिर्व्यासोऽपि लोकगतिं दृष्ट्वा अन्वशोचत्—

ऊर्ध्वबाहुर्विरौम्येष नहि कश्चिच्छृणोति मे।

लोकस्य गतिस्तु सत्कर्मण्यध्यवसायवतां कदाऽपि अनुकूलाऽऽसीत्, भविष्यति वा इति वक्तुं न शक्यते। तस्मात् हृदयदौर्बल्यं त्यक्त्वा स्वधर्मपालनमेव श्रेयः।

१– अर्जुनमनुसृत्य "नष्टो मोहः स्मृतिर्लब्धा" इति वचने प्रवृत्ताऽपि स्वकीय-गानकौशलस्य रक्षार्थमार्यस्यानुज्ञां विना पश्चात्पदामेव अनुभवाम्यात्मानम्।

२– अनुज्ञा तु स्वतःसिद्धा। शास्त्राध्ययनं हि गानकौशलस्य साधकमेव, नहि बाधकम्।

१– यद्येवमाश्वासयत्यार्यः तर्हि नितरां धन्याऽस्मि भवतो दर्शनलाभेन।

२– वास्तविको जिज्ञासुर्नहि मार्गभ्रंशमर्हतीति भगवतः प्रतिज्ञैवात्र कारणं तव नैराश्यपरिहारे। अर्जुनविषादयोगस्यापि स्वधर्मपरिनिष्ठयैवोपसंहारो विश्वविश्रुतः। उत्तिष्ठत, जाग्रत, प्राप्य वरान्निबोधत।

१—करिष्ये वचनं तवार्य! ( प्रणमति ) ( महापुरुषं निर्गच्छन्तं सानन्दास्रं विलोकयति )

## ( ६ ) पारिभाषिक-शब्द-विमर्शः

१ – अहो! नितरां सुभगा इयं गोष्ठी। धन्या ह्यस्माकं भगिनी इन्द्राणी देवी तिष्ठत्यत्र।

२—किं भो! धन्यतायाः किमत्र कारणम्?

१—किं न जानासि अङ्ग! यद् भगिनीयं स्वकीयं शोधप्रबन्धं सुष्ठु समाप्य प्रस्तुतवती मासचतुष्टयपूर्वम्। सुभद्रादेव्याः पथानुसारिणीयम्।

३—ओम्। ज्ञातम्! शोधसागरे निमग्नानाम् उन्मज्जननिमज्जनवशात्कण्ठागतप्राणानां तु शोधप्रबन्धसमापनमेव सौभाग्यस्य परमोत्कर्ष इव प्रतीयते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



४—हले ! भुक्तभोगिन एवात्र प्रमाणम्। त्वं तु Diploma in Music Appreciation—पाठ्यक्रमे संगीतश्रवणकौशलसम्पादन एव कृतकृत्यताम् अनुभवन्ती कथं ज्ञास्यसि शोधरतानां दुर्मरोद्वेगम् ?

५—अलमत्र विवादेन। कश्चित् चेतःश्रवणमङ्गलः संवाद एव प्रचलतु। नो चेत् समवेताः सामाजिका अत्र किं भावयिष्यन्ति ?

१—सत्यं कथयति भगिनी। मिथोऽस्माकं संवादोऽस्तु, गम्भीरशास्त्रवचनानामनुवादोऽस्तु नः सम्भाषणे।

२—संवादार्थं तु प्रथमं वादोऽपेक्षितः।

३—भवानेवात्र वादी भवतु नाम।

४—आः, त्वमपि प्रगल्भेव जल्पसि ?

५—इयमवहेलापात्रमिति कथं मन्यते त्वया ? डिप्लोमा—पाठ्यक्रमेऽपि संगीतशास्त्रस्य मूलभूतविषयाणां परिचयस्तु जायत एव।

१—नूनमियं लघुभगिन्यपि संवादेऽस्मिन् भागधेयस्याधिकारिणी भवितुमर्हति

२—अलमतिप्रसङ्गेन। अधुना इन्द्राणीदेव्याः समक्षं कतिपयप्रश्ना निवेदनीया अस्माभिः।

३—तद् विद्धि प्रणिपातेन, परिप्रश्नेन, सेवया। तदत्र प्रणिपातं, सेवां च विहाय, परिप्रश्न एव श्रेयान् अस्माकं कृते।

४—चपलाऽसि खलु मुग्धे।

५—दुग्धमुग्धाननेयं क्षन्तव्या।

१—एकः प्रश्नस्तु मम चेतः समुद्वेलयति। तन्निवेदने भवत्या अनुज्ञा वर्तते वा न वा।

५—बाढम्। कथय निर्भयम्।

१—सम्पन्नशोधप्रबन्धा भवती कृतार्थामात्मानं मन्यते वा न वा।

५—साधु पृष्टम्। कृतार्थतायास्तु नास्ति काऽपि कथा। जीवनव्यापि हि अनुसन्धानकर्म। शोधप्रबन्धलेखनं तु तत्र दीक्षास्थानीयमेव। वास्तविकं शोधकर्म तु तदनन्तरमेव प्रारभ्यते।

२—अहो ! अनुसरणीया भवत्या ज्ञाननिष्ठा।

४—एवमेव। कुत्र लब्धेयं भवत्या ?



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



५—पीएच० डीत्युपाधिं प्रति लौल्यं विहाय सत्यानुसन्धाने दृढमतिरनायास-मेव उद्भूता अस्मिन् संगीतशास्त्र-विभागे कार्यारम्भानन्तरम्। सत्यस्यानन्तविस्तरः क्षितिज इव यदा दृष्टिपथम् आक्रामति तदा शोध-प्रबन्धलेखनस्य लघुताया बोधः सहजां विनम्रतां जनयति।

४—बहु शोभनम्! अस्माकं कृते भवत्याः कोऽपि निर्देशो यदि स्यात् तर्हि तस्य ख्यापनरूपोऽनुग्रहो विधातव्यः।

५—साधु उक्तम्। नितरां तुष्टाऽस्मि युष्माकं जिज्ञासां दृष्ट्वा। एक एव निर्देशो यदि अपेक्षितः तर्हि पारिभाषिकशब्दानाम् अर्थविकासस्येतिहासं प्रति ध्रुवा दृष्टिः अनुसन्धित्सुभिः आधेया इत्येव वक्तुमिच्छामि।

२—कतिपयैरुदाहरणैर्यदि स्वीयमभिप्रायं स्पष्टीकरोतु भवती, तर्हि उपकृताः स्याम।

५—बाढम्। अधिकारि-श्रोतृसमुदाये स्वीयाभिप्रायनिवेदनं तु परमसुखावहम्।

३—अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख, मा लिख मा लिखेति प्रसिद्धा सूक्तिः।

५—एवमेव। त्रीण्युदाहरणान्यत्र सद्यो मनसि आगच्छन्ति।

१—श्रवणोत्सुका वयम्।

५—स्वरशब्दस्तानशब्दः श्रुतिशब्दश्च। प्रथमं स्वरशब्दमधिकृत्य किञ्चित् कथयामि।

३—सर्वपरिचितोऽयं शब्दः।

५—आम्। किन्तु सुपरिचितोऽप्ययं शब्दो गम्भीरविचारसापेक्षः।..... व्याकरणशास्त्रे "स्वयं राजन्ते इति स्वराः"—इति निरुक्तिः प्रसिद्धा। अनेन स्वराणामन्यनिरपेक्षत्वं सूच्यते।

४—मतङ्गेनापि इयमेव निरुक्तिः स्वीकृता—

राजृ दीप्ताविति धातोः स्वशब्दपूर्वकस्य च।
स्वयं यो राजते यस्मात् तस्मादेष स्वरः स्मृतः॥

५—आम्। किञ्चिद् विरम्य श्रूयताम्। वैदिकलौकिकव्यवहारे उच्चारण-गतोच्चत्वनीचत्वधर्मयोरपि स्वरशब्देनैवाभिधानं दृश्यते।

१—आम्। स्मरामि किञ्चित्—
'उच्चैरुदात्तः, नीचैरनुदात्तः' इति सूत्रयोर्भाष्ये पतञ्जलेरुक्तिम्, यत् उच्चत्वनीचत्वधर्मौ स्वरस्यैव नहि व्यञ्जनस्य।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



५—सुष्ठु। अतो हेतोः स्वरशब्देनैव वैदिकपाठस्य लौकिकव्यवहारस्य वा उच्चत्वनीचत्वम् उक्तं चिरन्तनैः। तथाहि—स्वयंराजत्वस्य, उच्चत्वनीचत्व-धर्मस्य च समावेशः स्वरशब्दे सिद्धः।

४—किन्तु शार्ङ्गदेवेन संगीतरत्नाकरे 'स्वतो रञ्जयति इति स्वरः' इति नवीना निरुक्तिः प्रस्तुता। यथा—

श्रुत्यनन्तरभावी यः स्निग्धोऽनुरणनात्मकः।
स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते॥

५—सत्यम्। स्वरस्य लक्षणेऽस्मिन् लक्षणचतुष्टयमन्वितम्।

प्रथमतः—श्रुतीतिनियतस्थानोद्भूतत्वम्।

द्वितीयतः—श्रुतीतिप्रथमाघातजस्य अनुरणनहीनस्य ध्वनेरनन्तरत्वम्।

तृतीयतः—अनुरणनात्मकतया स्निग्धत्वम्।

चतुर्थतः—स्वतो अन्यनिरपेक्षरूपेण रञ्जकत्वम्, नहि स्वयंराजत्व-मात्रम्।

स्वरशब्दस्यार्थविकासस्यास्य इतिहासे अभिनवगुप्तस्य योगदानं स्मरणीयम्।

४—किं तत्?

